श्री विष्णु हृदय स्तोत्रं

श्री विष्णु हृदय स्तोत्रं

अस्य श्री विष्णु हृदय स्तोत्रस्य संकर्षण ऋषिः, अनुष्टुप् त्रिष्टुप् गायत्री च यथायोगं छंदः, श्रीमहाविष्णुः परमात्मा देवता, भगवत्प्रीत्यर्थे जपे विनियोगः

संकर्षणः उवाच –
ममाग्रतस्सदा विष्णुः पृष्ठतश्चापि केशवः |
गोविंदो दक्षिणे पार्श्वे वामे च मधुसूधनः ||1||

उपरिष्टात्तु वैकुंठो वराहः पृथिवीतले |
अवांतरदिशो यास्स्युः तासु सर्वासु माधवः ||2||

गच्छतस्तिष्ठतो वापि जाग्रतस्स्वप्नतोऽपि वा |
नरसिंहकृता गुप्तिः वासुदेवमयो ह्यहं ||3||

अव्यक्तं चैवास्य योनौ वदंति
व्यक्तं तेऽहं दीर्घमायुर्गतिं च |
वह्निं वक्त्रं चंद्रसूर्यौ च नेत्रे
दिशश्श्रोत्रे प्राणमाहुश्च वायुं ||4||

वाचं वेदा हृदयं वै नभश्च
पृथ्वी पादौ तारका रोमकूपाः |
सांगोपांगा ह्यधिदेवता च विद्या
ह्युपस्थं ते सर्व एते समुद्राः ||5||

तं देवदेवं शरणं प्रजानां
यज्ञात्मकं सर्वलोक प्रतिष्ठं |
यज्ञं वरेण्यं वरदं वरिष्ठं
ब्रह्माणमीशं पुरुषं नमस्ते ||6||

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतं |
ऋतेमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनं ||7||

महाभारतकाख्यानं कुरुक्षेत्रं सरस्वतीं |
केशवं गांच गंगांच कीर्तयन्नावसीदति ||8||

ॐ भूः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः |
ॐ भुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः |
ॐ सुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः |
ॐ भूर्भुवस्सुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः |

ॐ प्रद्युम्नाय पुरुषाय वासुदेवाय नमो नमः |
ॐ अनिरुद्धाय पुरुषाय वासुदेवाय नमो नमः |
ॐ भवोद्भवाय पुरुषाय वासुदेवाय नमो नमः |
ॐ केशवाय पुरुषाय वासुदेवाय नमो नमः |
ॐ नारायणाय पुरुषाय वासुदेवाय नमो नमः |
ॐ माधवाय पुरुषाय वासुदेवाय नमो नमः |
ॐ गोविंदाय पुरुषाय वासुदेवाय नमो नमः |
ॐ विष्णवे पुरुषाय वासुदेवाय नमो नमः |
ॐ मधुसूदनाय पुरुषाय वासुदेवाय नमो नमः |
ॐ त्रिविक्रमाय पुरुषाय वासुदेवाय नमो नमः |
ॐ वामनाय पुरुषाय वासुदेवाय नमो नमः |
ॐ श्रीधराय पुरुषाय वासुदेवाय नमो नमः |
ॐ हृषीकेशाय पुरुषाय वासुदेवाय नमो नमः |
ॐ पद्मनाभाय पुरुषाय वासुदेवाय नमो नमः |
ॐ दामोदराय पुरुषाय वासुदेवाय नमो नमः |
ॐ सत्याय पुरुषाय वासुदेवाय नमो नमः |
ॐ ईशानाय पुरुषाय वासुदेवाय नमो नमः |
ॐ तत्पुरुषाय पुरुषाय वासुदेवाय नमो नमः |
ॐ सत्पुरुषाय पुरुषाय वासुदेवाय नमो नमः |
ॐ प्रणवेंद्र विष्णो शतसहस्रनेत्रे पुरुषाय वासुदेवाय नमो नमः |

य इदं विष्णुहृदयमधीयते ब्रह्महत्यायाः पूतो भवति पतितसंभाषणात्पूतो भवति
सुरापानात्पूतो भवति सुवर्णस्तेयात्पूतो भवति असत्यभाषणात्पूतो भवति अगम्यागमनात्पूतो भवति वृषलीगमनात्पूतो भवति अभक्ष्यभक्षणात्पूतो भवति ब्रह्मचारी सुब्रह्मचारी भवति अनेक क्रतुसहस्रेणेष्टं भवति गायत्र्याः षष्टिसहस्राणि जप्तानि भवंति चत्वारो वेदाश्चाधीता भवंति सर्ववेदेषु ज्ञातो भवति सर्वतीर्थेषु स्नातो भवति। यदि कस्यचिन्नब्रूयाच्छ्वित्री भवति। अष्टौ ब्राह्मणाग् ग्राहयित्वा विष्णुलोकमाप्नोति मानसेन गतिर्भवति न नश्यति मंत्रः यत्र यत्रेच्छेत्तत्र तत्रोपजायते स्मरति चात्मानं भगवान्महाविष्णुरित्याह |

इति श्री विष्णुहृदयस्तोत्रं |